Digitized By Siddhanta eGangotri Gyaan Kosha

॥ ओ३म् ॥

यत्र विश्वं भवत्येकनीडम्

आचार्य-रामदयालुना सम्पादिता

निरुक्त-निर्वचनिका

(द्वितीय संस्करण)

प्राप्तिस्थान—

संस्कृत सेवा संस्थान दिल्ली प्रदेश (पंजी०)

५९/८, मध्य मार्ग, तुगलकाबाद विस्तार,

नव दिल्ली-११००१९

चैत्र शु. १ वि. सं. २०४५

मार्च १८, सन् १९८८ [मूल्य ३-००

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

॥ ओ३म् ॥

यत्र विश्वं भवत्येकनीडम्

आचार्य-रामदयालुना सम्पादिता—

निरुक्त-निर्वचनिका

प्राप्तिस्थानम्—

संस्कृतसेवासंस्थानम् दिल्ली प्रदेश (पंजी०)

३२३०, लाल दरवाजा, बाजार सीताराम,

दिल्ली-११०००६

स्वतन्त्रता दिवस १९८३ मूल्य २/-

CC-0. Prof. Satya Vrat Shastri Collection.

प्रकाशक :
Digitized By Siddhanta eGangotri Gyaan Kosha
संस्कृत सेवा संस्थान, दिल्ली प्रदेश (पंजी०)
३२३०, लाल दरवाजा, बाजार सीताराम,
दिल्ली-११०००६

संस्करण : १९८३

मूल्य : २.०० रुपये

मुद्रक :
वैदिक प्रेस
कैलाशनगर, दिल्ली-३१
CC-0. Prof. Satya Vrat Shastri Collection.

॥ ओ३म् ॥

Digitized By Siddhanta eGangotri Gyaan Kosha

यास्कस्तुतौ गीतिका

तमुदारहृदं दयया विकलम्,
कृतधर्मसुकर्मविवेकमलम् ।
तपसा क्षपिताऽखिलकायमलम्,
प्रणमामि महामुनियास्कमहम् ॥१॥

परया कृपया सुनिरुक्तिपरम्,
ऋषिदेवगणादिकभूतिकरम् ।
निगमागमवेदिषु धन्यतरम्,
प्रणमामि महामुनियास्कमहम् ॥२॥

श्रुतितत्त्वविदां प्रथमं गणितम्,
विविधैषणया रहितं सहितम् ।
विहताखिल - मानसुमानगणम्,
प्रणमामि महामुनियास्कमहम् ॥३॥

भगवत्यनुपाधिक - भक्तिकरम्,
परमेशलयं श्रितब्रह्मसुखम् ।
महिनं जनजीवनमौर्व्य सम्,
प्रणमामि महामुनियास्कमहम् ॥४॥

CC-0. Prof. Satya Vrat Shastri Collection.

आमुख

Digitized By Siddhanta eGangotri Gyaan Kosha

वेद के जिज्ञासु यह भली भांति जानते हैं कि वेदार्थ ज्ञान के लिए निघण्टु व निरुक्त का अध्ययन आवश्यक है। निरुक्त की निर्वचन प्रक्रिया शब्दार्थ सम्बन्ध की तरह वेदार्थ के गूढ़ार्थ ज्ञान के लिए आवश्यक है। निरुक्तकार ने स्वयं कहा भी है—अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते।' इस निर्वचन शास्त्र के बिना मन्त्रों में अर्थ का ज्ञान नहीं होता। इसे स्पष्ट करने के लिए प्रपञ्च हृदयकार कहते हैं—किमुत निरुक्ते यदर्थप्रधानमेव। २।२। तान्यवयवप्रत्यवयव-विभागपूर्वकं स्वरवर्णमात्रादिभेदेन अर्थनिर्वचनाय निर्वचनानि। वही पृष्ठ ९२। वे निर्वचन शब्द के अवयव प्रत्यवयव विभागपूर्वक स्वर-वर्णमात्रादि भेद से अर्थज्ञान के लिए ही होते हैं।

व्याकरण के तत्त्वज्ञान के लिए पातञ्जल महाभाष्य का पारायण अनिवार्य है। व्याकरण जिज्ञासु महाभाष्य के नवाह्निक एवम् अङ्गा-धिकार को पढ़ते हैं। इसी प्रकार निर्वचन के ज्ञान के लिए विद्वानों ने निरुक्त १-४ व ७वें अध्याय के निर्वचन के पठन-पाठन की प्रक्रिया बनाई है।

किसी भी ग्रन्थ के विषय ज्ञान के लिए उसका आद्योपान्त अध्ययन अनिवार्य है अन्यथा उसका ज्ञान अपूर्ण ही रहता है। प्राचीन काल में बृहस्पति आदि कई आचार्यों के निरुक्त थे। उनमें यास्क प्रणीत निरुक्त १४ अध्यायों का इस समय प्रचलित है। सारे निरुक्त में लग-भग १२९८ निर्वचन हैं। इनका सम्पूर्ण पारायण वेदार्थ का परम साधक है।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अथ प्रथमोऽध्यायः

१. **निघण्टवः**—कस्मात् निगमा इमे भवन्ति। छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः। ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः। अपि वाऽऽहननादेव स्युः समाहृता भवन्ति। यद्वा समाहृता भवन्ति।

२. **निपाताः**—उच्चावचेष्वर्थेषु निपतन्ति।

३. **आचार्यः**—आचारं ग्राहयति, आचिनोत्यर्थान्, आचिनोति बुद्धिमिति वा।

४. **कुल्माषाः**—कुलेषु सीदन्ति।

५. **वयाः**—शाखाः, वेतेर्वातायना भवन्ति।

६. **शाखाः**—खशयाः। शक्नोतेर्वा।

७. **अद्य**—अस्मिन् द्यवि।

८. **द्युः**—इत्यह्नो नामधेयम्, द्योतत इति सतः।

९. **श्वः**—उपाशंसनीयः कालः।

१०. **ह्यः**—हीनः कालः।

CC-0. Prof. Satya Vrat Shastri Collection.

११. **अद्भुतम्**—कः यदभूतम्, इतरद् अद्भुतमभूतमिव।

१२. **अन्यः**—नानेयः।

Digitized By Siddhanta eGangotri Gyaan Kosha

१३. **चित्तं**—चेततेः ।

१४. **वरो**—वरयितव्यो भवति ।

१५. **जरिता**—गरिता ।

१६. **मघम्**—इति धननामधेयम्, मंहतेर्दानकर्मणः ।

१७. **दक्षिणा**—दक्षतेः समर्द्धयतिकर्मणो व्यृद्धं समर्द्धयति इति । अपि वा प्रदक्षिणा गमनात् दिशमभि प्रेत्य ।

१८. **दक्षिणा दिग्**—हस्तप्रकृतिः ।

१९. **दक्षिणो हस्तः**—दक्षतेरुत्साहकर्मणः । दाशतेर्वा स्यात् दानकर्मणः ।

२०. **हस्तः**—हन्तेः प्राग्रुर्हनने ।

२१. **भगो**—भजतेः ।

२२. **बृहद्**—इति महतो नामधेयम्, परिवृढं भवति ।

२३. **सुवीराः**—वीरवन्तः, कल्याणवीराः वा ।

२४. **वीरः**—वीरयत्यमित्रान् । वेतेर्वा स्याद् गतिकर्मणः । वीरयतेर्वा ।

२५. **सुरुचः**—आदित्यरश्मयः, सुरोचनात् ।

२६. **विसीमतः**—सीमा इति एतदनर्थकमुपबन्धमाददीत पञ्चमी कर्माणम् । सीम्नः सीमतः सीमातो मर्यादातः । सीमा मर्यादा विषीव्यति देशानिति ।

CC-0. Prof. Satya Vrat Shastri Collection.

२७. **ऋग्**—अर्चनी ।

Digitized By Siddhanta eGangotri Gyaan Kosha

२८. **गायत्रम्**—गायतेः स्तुतिकर्मणः ।

२९. **शक्वर्य**—ऋचः शक्नोतेः । तद् यद् आभिर्वृत्रमशकद् हन्तुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायते ।

३०. **ब्रह्मा**—सर्वविद्यः सर्वं वेदितुमर्हति । परिवृढः श्रुतः । ब्रह्म परिवृढं भवति सर्वतः ।

३१. **अध्वर्युः**—अध्वरयुः, अध्वरं युनक्ति । अध्वरस्य नेता, अध्वरं कामयते इति वा अपि वाऽधीयाने युरुपबन्धः ।

३२. **अध्वरः**—इति यज्ञ नाम । ध्वरति हिंसाकर्मा तत्प्रतिषेधः ।

३३. **अक्षिः**—चष्टेः, अनक्तेरित्याग्रायणः । तस्मादेते व्यक्ततरे इव भवत इति ह विज्ञायते ।

३४. **कर्णः**—कृन्ततेर्निकृत्तद्वारो भवति । ऋच्छतेरित्याग्रायणः । (ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते) ।

३५. **आस्यम्**—अस्यतेः । आस्यन्दत एतदन्नमिति वा ।

३६. **दघ्नं**—दघ्यतेः स्रवतिकर्मणः । दस्यतेर्वा स्याद् । विदस्ततरं भवति ।

३७. **प्रस्नेयाः**—स्नानार्हाः ।

३८. **ह्रदः**—ह्रादतेः शब्दकर्मणः । ह्लादतेर्वा स्यात् शीतिभावकर्मणः ।

CC-0. Prof. Satya Vrat Shastri Collection.

३९. **शिशिरम्**—शृणातेः शम्यतेर्वा ।

४०. **गिरः**—स्तुतयः गृणातेः ।

Digitized By Siddhanta eGangotri Gyaan Kosha

४१. **नरकम्**—न्यरकम्, नीचैर्गमनम्। नास्मिन् रमणं स्थानमल्पमप्यस्तीति वा।

४२. **सुरा**—सुनोतेः।

४३. **बिल्वम्**—भरणाद्वा भेदनाद्वा।

४४. **स्थाणु**—स्तिष्ठतेः।

४५. **अर्थो**—ऽर्नेररणस्थो वा।

४६. **सुवासाः**—कल्याणवासाः, कामयमाना वा।

४७. **बिल्मम्**—भिल्मम् भासनमिति वा।

४८. **धातुः**—दधातेः।

४९. **वाला**—दंशवारणार्था भवन्ति।

५०. **दंशो**—दशतेः।

५१. **मृगः**—माष्टेर्गतिकर्मणः।

५२. **भीमो**—बिभ्यत्यस्मात्।

५३. **भीष्मो**—ऽप्येतस्मादेव।

५४. **कुचरः**—इति चरति कर्म कुत्सितम्। अथ चेद् देवताभिधानम्, क्वायं न चरतीति।

५५. **गिरिष्ठाः**—गिरिस्थायी।

५६. **गिरिः**—पर्वतः समुद्गीर्णो भवति। मेघोऽपि गिरिरुच्यते समुद्गीर्णो भवति।

५७. **पर्वतः**—पर्ववान्।

CC-0. Prof. Satya Vrat Shastri Collection.

५८. **पर्वः**—पृणातेः प्रीणातेर्वा। अर्धमासपर्व देवानस्मिन् प्रीणन्तीति।

Digitized By Siddhanta eGangotri Gyaan Kosha

अथ द्वितीयोऽध्यायः

प्रथमः पादः

५९. **निर्वचनम्**—निष्कृष्य विगृह्य वचनम् ।

६०. **कम्बोजः**—कम्बलभोजाः कमनीयभोजा वा ।

६१. **कम्बलः**—कमनीयो भवति ।

६२. **दण्ड्यः पुरुषः**—दण्डमर्हतीति वा दण्डेन सम्पद्यत इति वा ।

६३. **दण्डः**—ददतेर्धारयतिकर्मणः । दमनादित्यौपमन्यवः । (दण्डमस्याकर्षत इति गर्हायाम्) ।

६४. **कक्ष्या**—कक्षं सेवते (रज्जुरश्वस्य) ।

६५. **कक्षः**—गाहतेः क्स इति नामकरणः । ख्यातेर्वानर्थकोऽभ्यासः । किमस्मिन् ख्यानमिति । कषतेर्वा । तत्सामान्यात् मनुष्यकक्षो बाहूमूलसामान्यादश्वस्य ।

६६. **राजपुरुषः**—राज्ञः पुरुषः ।

६७. **राजा**—राजतेः ।

६८. **पुरुषः**—पुरि षादः पुरिशयः पूरयतेर्वा, पूरयत्यन्तः इत्यन्तरपुरुषमभिप्रेत्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

६९. **विश्चकद्रः**—वीति चकद्र इति श्वगतौ भाष्यते । द्रातीति गतिकुत्सना । चकद्राति-कद्रातीति सतोऽनर्थकोऽभ्यासः । तद-

Digitized By Siddhanta eGangotri Gyaan Kosha

स्मिन्नस्तीति विश्चकद्रः ।

७०. **कल्याणवर्णरूपः**—कल्याणवर्णस्येवास्य रूपम् ।

७१. **कल्याणम्**—कमनीयं भवति ।

७२. **वर्णः**—वृणोतेः ।

७३. **रूपम्**—रोचतेः ।

द्वितीयः पादः

७४. **गौः**—इति पृथिव्या नामधेयम् । यद् दूरम् गता भवति । यच्चास्यां भूतानि गच्छन्ति । गातेर्वौकारो नामकरणः । पशुनामेह भवत्येतस्मादेव । आदित्योऽपि गौरुच्यते – उतादः परुषे गवि । पर्ववति भास्वतीत्यौपमन्यवः । ज्या अपि गौरुच्यते । गव्या चेत् ताद्धितम् । अथ चेत् न गव्या गमयति इषून् इति ।

७५. **मत्सरः**—सोमो मन्दतेस्तृप्तिकर्मणः । मत्सर इति लोभनाम, अभिमत्तः एनेन धनम् भवति ।

७६. **पयः**—पिबतेर्वा प्यायतेर्वा ।

७७. **क्षीरम्**—क्षरतेः । घसेर्वेरो नामकरणः उशीरमिति यथा ।

७८. **अंशुः**—शमष्टमात्रो भवति । अननाय शम्भवतीति वा ।

CC-0. Prof. Satya Vrat Shastri Collection.

७९. **चमः**—चरतेर्वा, उच्चरत भवतीति वा ।

८०. **वृक्षः**—व्रश्चनात्, वृत्वा क्षां तिष्ठतीति वा ।

Digitized By Siddhanta eGangotri Gyaan Kosha

८१. **क्षा**—क्षियतेर्निवासकर्मणः ।

८२. **विः**—इति शकुनिनाम, वेतेर्गतिकर्मणः ।

८३. **भूः**—इति बहुनो नामधेयम् प्रभवतीति सतः ।

८४. **शृङ्गम्**—श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा ।

८५. **पादः**—पद्यतेः । तन्निधानात्पदम् । पशुपादप्रकृतिः प्रभागपादः । प्रभागपादसामान्यादितराणि पदानि ।

८६. **निर्ऋतिः**—निरमणादृच्छतेः कृच्छ्रापत्तिरितरा ।

८७. **माता**—अन्तरिक्षम् निर्मीयन्तेऽस्मिन् भूतानि ।

८८. **योनिः**—अन्तरिक्षम् महानवयवः । परिवीतो वायुना । अयमपीतरो योनिरेतस्मादेव । जरायुना परियुतो भवति ।

८९. **वव्रिः**—इति रूप नाम । वृणोतीति सतः । वर्षेण प्रच्छाद्य पृथिवीं तत्पुनरादत्ते ।

९०. **हिरण्यम्**—कस्मात् ह्रियत आयम्यमानमिति वा, ह्रियते जनाज्जनमिति वा, हितरमणं भवतीति वा, हृदयरमणम् भवतीति वा, हर्यतेर्वा स्यात् प्रेप्साकर्मणः ।

CC-0. Prof. Satya Vrat Shastri Collection.

९१. **अन्तरिक्षं** कस्मात् ? अन्तरा क्षान्तं भवत्यन्तरेमे इति वा, शरीरेष्वन्तर-क्षयमिति वा ।

Digitized By Siddhanta eGangotri Gyaan Kosha

९२. **समुद्रः**—कस्मात् समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः, सम्मोदन्तेऽस्मिन् भूतानि, समुदको भवति, समुनत्तीति वा।

९३. **आर्ष्टिषेणः**—ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा।

९४. **सेना**—सेश्वरा, समानगतिर्वा।

९५. **पुत्रः**—पुरु त्रायते, निपरणाद्वा, पुन्नरकं ततस्त्रायत इति वा।

९६. **ऋषिः**—दर्शनात्। स्तोमान् ददर्शेत्यौपमन्यवः। तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भु अभ्यानर्षत् ते ऋषय अभवन् तद्ऋषीणाम् ऋषित्वम्।

९७. **उत्तरः**—उद्धततरो भवति।

९८. **अधरः**—अधोरः। अधो न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा।

९९. **शन्तनुः**—शंतनोऽस्त्विति वा शमस्मै तन्वा अस्त्विति वा।

१००. **पुरोहितः**—पुर एनं दधति।

१०१. **देवश्रुतं**—देवा एनं शृण्वन्ति।

१०२. **आदित्यम्**—आदत्ते रसान्, आदत्ते भासं ज्योतिषाम्, आदीप्तो भासेति वा, अदितेः पुत्र इति वा।

CC-0. Prof. Satya Vrat Shastri Collection.

१०३. **व्रतम्**—इति कर्म नाम, वृणोतीति सत्यः। इदमपीतरद्

Digitized By Siddhanta eGangotri Gyaan Kosha

व्रतमेतस्मादेव। निवृत्तिकर्म वारयतीति सतः। अन्नमपि व्रतमुच्यते यदावृणोति शरीरम्।

१०४. **स्वः**—आदित्यो भवति। सु-अरणः, सु-ईरणः। स्वृतो रसान्, स्वृतो भासं ज्योतिषाम्, स्वृतो भासेति वा।

१०५. **पृश्निः**—आदित्यो भवति। प्राश्नुत एनं वर्ण इति नैरुक्ताः, संस्पृष्टा रसान् संस्पृष्टा भासं ज्योतिषाम्, संस्पृष्टो भासेति वा अथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च।

१०६. **नाकः**—आदित्यो भवति। नेता रसानाम्, नेता भासाम्, ज्योतिषां प्रणयः। अथ द्यौः।

१०७. **कम्**—इति सुखनाम। तत् प्रतिषिद्धं प्रतिषिध्येत।

१०८. **गौः**—आदित्यो भवति। गमयति रसान्, गच्छत्यन्तरिक्षे। अथ द्यौर्यत् पृथिव्या अधि दूरं गता भवति। यच्चास्यां ज्योतींषि गच्छन्ति।

१०९. **विष्टप्**—आदित्यो भवति। आविष्टो रसान् आविष्टो भासं ज्योतिषाम्, आविष्टो भासेति वा। अथ द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च।

११०. **नभः**—आदित्यो भवति। नेता भासाम्, ज्योतिषां प्रणयः। अपि वा भन एव स्याद् विपरीतः, न न भातीति वा।

CC-0. Prof. Satya Vrat Shastri Collection.

१११. **रश्मिः**—यमनात्।

११२. **दिशः**—दिशतेः, आसदनात्, अपि वाभ्यशनात्।

Digitized By Siddhanta eGangotri Gyaan Kosha

११३. काष्ठाः—दिशो भवन्ति । क्रान्त्वा स्थिता भवन्ति । काष्ठा उपदिशो भवन्तीतरेतरं क्रान्त्वा स्थिता भवन्ति । आदित्योऽपि काष्ठोच्यते, क्रान्त्वा स्थितो भवति । आज्यन्तोऽपि काष्ठोच्यते । क्रान्त्वा स्थितो भवति । आपोऽपि काष्ठा उच्यन्ते । क्रान्त्वा स्थिता भवन्ति ।

११४. शरीरम्—शृणातेः शम्नातेर्वा ।

११५. दीर्घम्—द्राघतेः ।

११६. तमः—तनोतेः ।

११७. आशयत्—आशेतेः ।

११८. इन्द्रशत्रुः—इन्द्रोऽस्य शमयिता वा शातयिता वा ।

११९. दासपत्नीः—दासाधिपत्न्यः ।

१२०. दासः—दस्यतेरुपदासयति कर्माणि ।

१२१. अहिगोपाः—अहिना गुप्ताः ।

१२२. अहिः—अयनात्, एति अन्तरिक्षे । अयमपि इतरः अहिरेतस्मादेव, निर्हसितोपसर्गः आहन्तीति ।

१२३. पणिः—वणिग् भवति । पणनात् ।

१२४. वणिक्—पण्यं नेनेक्ति ।

१२५. बिलम्—भरम् भवति बिभर्तेः ।

१२६. वृत्रः—वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा ।

CC-0. Prof. Satya Vrat Shastri Collection.

१२७. रात्रिः कस्मात्—प्ररमयति भूतानि नक्तञ्चारीणि । उपरमयतीतराणि ध्रुवी करोति । रातेर्वा स्याद् दानकर्मणः

Digitized By Siddhanta eGangotri Gyaan Kosha

प्रदीयन्तेऽस्यामवश्यायाः।

१२८. **उषाः**—उच्छतीति सत्याः रात्रेरपरः कालः।

१२९. **चित्रम्**—चायनीयं पूजनीयं वा।

१३० **प्रकेतः**—प्रकेतनं प्रज्ञाततमम्।

१३१. **स्त्रीयोनिः**—अभियुत एनां गर्भः।

१३२. **रुशत्**—इति वर्ण नाम। रोचतेर्ज्वलतिकर्मणः।

१३३. **श्वेत्या**—श्वेततेः।

१३४. **कृष्णम्**—कृष्यतेर्निकृष्टो वर्णः।

१३५. **अहः**—उपाहरन्त्यस्मिन् कर्माणि।

१३६. **मेघः**—कस्मात् मेहतीति सतः।

१३७. **उपरः**—उपलो मेघो भवति। उपरमन्तेऽस्मिन्नभ्राणि। उपरता आप इति वा।

१३८. **प्रथमः**—इति मुख्य नाम। प्रतमो भवति।

१३९. **कृन्तत्रम्**—अन्तरिक्षं विकर्तनं मेघानाम्।

१४०. **अनूपाः**—अनुवपन्ति लोकान् स्वेन कर्मणा। अयमपीतरोऽनूप एतस्मादेव। अनूप्यत उदकेन अपि वा अन्वाप इति स्यात्।

१४१. **बृबूकम्**—इति उदक नाम। ब्रवीतेर्वा शब्दकर्मणो भ्रंशतेर्वा।

CC-0. Prof. Satya Vrat Shastri Collection.

१४२. **पुरीषम्**—पृणातेः पूरयतेर्वा।

Digitized By Siddhanta eGangotri Gyaan Kosha

१४३. वाक्—कस्मात् वचेः।
१४४. शुष्मम्—इति बल-नाम, शोषयतीति सतः।
१४५. बिसम्—बिस्यतेर्भेदनकर्मणो वृद्धिकर्मणो वा।
१४६. सानु—समुच्छ्रितं भवति, समुन्नुन्नमिति वा।
१४७. पारावतघ्नीम्—पारावारघातिनीम्।
१४८. पारम्—परम् भवति।
१४९. अवारम्—अवरम्।
१५०. उदकम्—उनत्तीति सतः।
१५१. नद्यः कस्मात्—नदना इमा भवन्ति शब्दवत्यः।
१५२. विश्वामित्रः—सर्वमित्रः सर्वं संसृतम्।
१५३. सुदाः—कल्याणदानः।
१५४. ऋतावरीः—ऋतवत्यः।
१५५. पैजवनः—पिजवनस्य पुत्रः।
१५६. पिजवनः—स्पर्द्धनीय-जवो वा ऽमिश्रीभाव गतिर्वा।
१५७. ऋतम्—इति उदकनाम प्रत्यृतं भवति।
१५८ मुहूर्त्तः—मुहूर्त्तुः।
१५९. ऋतुः—अर्त्तेर्गतिकर्मणः।
१६०. मुहुः—मूढ इव कालो यावदभीक्ष्णं चेति।
CC-0. Prof. Satya Vrat Shastri Collection.
१६१. अभीक्ष्णम्—अभिक्षणं भवति।
१६२. क्षणः—क्षणोतेः प्रक्षणुतः कालः।

Digitized by Siddhanta eGangotri Gyaan Kosha

१६३. **कालः**—कालयतेर्गतिकर्मणः।

१६४. **कुशिकः**—राजा बभूव क्रोशतेः शब्दकर्मणः क्रंशतेर्वा-स्यात् प्रकाशयतिकर्मणः।

१६५. **साधुः**—विक्रोशयितार्थानामिति वा।

१६६. **सुपाणिः**—कल्याणपाणिः।

१६७. **पाणिः**—पणायतेः पूजाकर्मणः। प्रगृह्य पाणी देवान पूजयन्ति।

१६८. **उर्व्यः**—ऊर्णोतेर्वृणोतेरित्यौर्णवाभः।

१६९. **अश्वः**—अश्नुतेऽध्वानम्। महाशनो भवतीति वा।

१७०. **दधिक्रा**—इत्येतत् दधत् क्रामतीति वा, दधत् क्रन्दतीति वा, दधदाकारी भवतीति वा।

१७१. **वाजी**—वेजनवान्। क्षेपणमनु तूर्णमश्नुतेऽध्वानम।

१७२. **ग्रीवा**—गिरतेर्वा गृणातेर्वा गृह्णातेर्वा।

१७३. **पन्था**—पततेर्वा पद्यतेर्वा पन्थतेर्वा।

१७४. **अङ्कः**—अञ्चतेः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अथ तृतीयोऽध्यायः

१७५. **कर्म**—क्रियत इति सतः ।

१७६. **अपत्यम्**—अपततं भवति । नानेन पततीति वा ।

१७७. **अरणः**—अपार्णो भवति ।

१७८. **रेक्णः**—इति धननाम । रिच्यते प्रयतः ।

१७९. **शेषः**—इति अपत्यनाम । शिष्यत इति ।

१८०. **ओकः**—इति निवास नामोच्यते ।

१८१. **वाजी**—वेजनवान् ।

१८२. **दुहिता**—दुर्हिता । दूरे हिता । दोग्धेर्वा ।

१८३. **गर्तः**—सभास्थाणुः । गृणातेः । सत्यसङ्गरो भवति । श्मशान संचयोऽपि गर्त उच्यते, अपगूर्णो भवति । रथोऽपि गर्त उच्यते । गृणातेः स्तुतिकर्मणः स्तुनतमं यानम् ।

१८४. **श्मशानम्**—श्मशयनम् । श्म शरीरम् ।

१८५. **शरीरम्**—शृणातेः शम्नातेर्वा ।

१८६. **श्मश्रुः**—(लोम) श्मनि श्रितं भवति ।

१८७. **लोम**—लुनातेः लीयतेर्वा ।

१८८ **जामिः**—अन्ये स्वां [illegible] । जमतेर्वा गतिकर्मणः । निर्गमनप्राया भवति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

१८९. **मनुष्यः**—मत्वा कर्माणि सीव्यन्ति । मनस्यमानेन सृष्टाः । मनस्यतिः पुनर्मनस्वीभावे । मनोरपत्यम् । मनुषो वा ।

१९० **असुराः**—असुरताः स्थानेषु वा । अस्ताः स्थानेभ्य इति वा । अपि वा सुरिति प्राणनाम अस्तः शरीरे भवति । तेन तद्वन्तः (असुराः) । सोः देवानसृजत तत् सुराणां सुरत्वम् । असोः असुरान् असृजत तद् असुराणामसुरत्वम् ।

१९१. **ऊर्क्**—इति अन्न नाम । ऊर्जयतीति सतः । सुप्रवृक्णम् इति वा ।

१९२. **निषादः**—निषदनो भवति । निषण्णमस्मिन् पापकम् इति वा ।

१९३. **बाहुः**—प्रबाधत आभ्यां कर्माणि ।

१९४. **अङ्गुलयः**—अग्रगामिन्यो भवन्ति, इति वा । अग्रगालिन्यो भवन्तीति वा । अग्रकारिण्यो भवन्तीति वा । अग्रसारिण्यो भवन्तीति वा । अङ्कना भवन्तीति वा । अञ्चना भवन्तीति वा । अपि वाभ्यञ्चनादेव स्युः ।

१९५. **अवनयः**—अङ्गुलयो भवन्ति । अवन्ति कर्माणि । कक्ष्याः प्रकाशयन्ति कर्माणि ।

१९६. **अभिशवः**—अङ्गुलयो भवन्ति । अभ्यश्नुवते कर्माणि ।

१९७. **धूः**—अङ्गुलयो भवन्ति । धूवतेर्वधकर्मणः । इतरा धूरेतस्मादेव । विहन्ति वहम् । धारयतेर्वा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

१९८. योक्त्राणि—अङ्गुलयः भवन्ति । योजयन्ति कर्माणि ।

१९९. अन्नम्—आनतं भूतेभ्यः । अत्तेर्वा ।

२००. बलम्—भरं भवति । बिभर्त्तेः ।

२०१. धनम्—धिनोतीति सतः ।

२०२. क्षिप्रम्—संक्षिप्तो विकर्षः ।

२०३. अन्तिकम्—आनीतं भवति ।

२०४. संग्रामः—संगमनाद्वा संगरणाद्वा । संगतौ ग्रामाविति वा ।

२०५. एकः—इता (द्वितीयां प्राप्ता) संख्या ।

२०६. द्वौ=द्रुततरा संख्या ।

२०७. त्रयः=तीर्णतमा संख्या ।

२०८. चत्वारः—चलिततमा संख्या ।

२०९ पञ्च—प्राञ्चतेः ।

२१०. षट्—पुनः सहतेः ।

२११. सप्त—सृप्ता संख्या ।

२१२. अष्टौ=अश्नोतेः ।

२१३. नव—न वननीया (सेवनीया), न अवाप्ता वा ।

२१४. दश—दस्ता । दृष्टार्था वा ।

२१५ विंशति—द्विर्दशतः ।

२१६. शतम्—दश दशतः ।

CC-0. Prof. Satya Vrat Shastri Collection.

२१७. सहस्रम्—सहस्वत् (बलवती) ।

Digitized By Siddhanta eGangotri Gyaan Kosha

२१८. **अयुतम्**—(दश सहस्रम्)।

२१९. **नियुतम्**—

२२०. **प्रयुतम्**—

२२१. **अर्बुदः**—मेघः। अरणमम्बु तद्ददातीत्यर्बुदः। कोटि-वाचकोऽर्बुदः। अम्बुमद् भाति अम्बुमद् भवतीति वा।

२२२. **खलः**—इति संग्राम नाम भवति। खलतेर्वा स्खलतेर्वा। अयमपीतरः खलः एतस्मादेव। अथवा समास्कन्नो भवति।

२२३. **आक्षाणः**—आप्नुवानः। अश्नोतीति सतः।

२२४. **आपानः**—आप्नुवानः। आप्नोतीति सतः।

२२५. **वियातः**—वियातयत इति वा। वियातयेति वा।

२२६. **आखण्डलः**—आखण्डयितः।

२२७ **खण्डम्**—खण्डयतेः।

२२८. **तडित्**—इति अन्तिकवधयोर्वाचकः। ताडयतीति सतः।

२२९. **अरातयः**—अदानकर्माणः। अदानप्रज्ञा वा।

२३०. **अप्नः**—इति रूप नाम। आप्नोतीति सतः।

२३१. **विद्युत्**—तडिद् भवति। सा ह्यवताडयति। दूराच्च दृश्यते।

२३२. **वज्रः**—वर्जयतीति सतः।

२३३. **कुत्सः**—(वज्र नाम) कुत्सितः कुत्सः ऋषिः। कर्ता स्तोमानाम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

२३४. इनः—(ईश्वर नाम) सनित ऐश्वर्यमेति वा। सनितमने-नैश्वर्यमिति वा।

२३५. सुपर्णाः—सुपतनाः। आदित्यरश्मयः।

२३६. धीरः—धीमान्।

२३७ पाकः—पक्तव्यो भवति।

२३८. बहुः—प्रभवतीति सतः।

२३९. ह्रस्वो—ह्रसतेः।

२४०. महान्—मानेनान्याञ्जहातीति शाकपूणिः। मंहनीयो भवतीति वा।

२४१. गृहाः—गृह्णन्तीति सताम्।

२४२. सुखम्—सुहितं खेभ्यः।

२४३. खम्—पुनः खनतेः।

२४४. रूपम्—रोचतेः।

२४५. सत्यम्—सत्सु तायते। सत्प्रभवं भवतीति वा।

२४६. तनूत्यक्—तनूत्यक्ता।

२४७. वनर्गू—वनगामिनौ।

२४८. तस्करः—तत्करो भवति यत्पापकमिति नैरुक्ताः। तनोतेर्वा स्यात्। सन्ततकर्मा भवति। अहोरात्रकर्मा वा।

२४९. देवरः—द्वितीयं वर उच्यते। दीव्यति कर्मा।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

२५०. **विधवा**—विधातृका भवति । विधवनाद्वा । विधावनाद्वा इति चर्मशिराः । अपि वा धव इति मनुष्य नाम तद् वियोगाद् विधवा इत्युच्यते ।

२५१. **मर्यः**—मनुष्यः । मरणधर्मा ।

२५२. **योषा**—यौतेः

२५३. **आत्मा**—अततेर्वा । आप्तेर्वा । अपि वा आप्त इव स्यात् । यावद् व्याप्तिभूत इति ।

२५४. **जारः**—आदित्योऽत्र जार उच्यते । रात्रेर्जरयिता भासाम् वा । अपि त्वयं मनुष्यजार एवाभिप्रेतः स्यात् ।

२५५. **मेषः**—मिषतेः ।

२५६. **पशुः**—पश्यतेः ।

२५७. **वृषलः**—वृषशीलो भवति । वृषाशीलो वा ।

२५८. **प्रियमेधः**—प्रियाऽस्य मेधा ।

२५९. **प्रस्कण्वः**—कण्वस्य पुत्रः । कण्वप्रभवः ।

२६०. **भृगुः**—भृज्यमानो न देहे ।

२६१. **अङ्गारा**—अङ्कना (अञ्चना) ।

२६२. **अत्रिः**—न त्रय इति ।

२६३. **वैखानसः**—विखननात् ।

२६४. **भारद्वाजः**—भरणात् ।

CC-0. Prof. Satya Vrat Shastri Collection.

२६५. **विरूपः**—नाना रूपः ।

२६६. **महिव्रतः**—महाव्रतः।

Digitized By Siddhanta eGangotri Gyaan Kosha

२६७. **काकः**—(कुत्सायाम्) शब्दानुकृतिः, तदिदं शकुनिषु बहुलम्। न शब्दानुकृति इत्यौपमन्यवः। काकोऽपकालयितव्यो भवति।

२६८. **तित्तिरिः**—तरणात्। तिलमात्र चित्र इति वा।

२६९. **कपिञ्जलः**—कपिरिव जीर्णः। कपिरिव जवते। ईषत् पिङ्गलो वा। कमनीयं शब्दं पिञ्जयतीति वा।

२७०. **श्वा**—आशुयायी। शवतेर्वा स्याद् गतिकर्मणः। श्वसितेर्वा।

२७१. **सिंह**—सहनात्। हिंसेर्वा स्याद् विपरीतस्य। सं पूर्वस्य वा हन्तेः। संहाय हन्तीति।

२७२. **व्याघ्रः**—व्याघ्राणात्। व्यादाय हन्तीति वा।

२७३. **मेधावी**—मेधया तद्वान् भवति।

२७४. **मेधा**—मतौ धीयते।

२७५. **स्तोता**—स्तवनात्।

२७६. **यज्ञः**—प्रख्यातं यजति कर्मेति नैरुक्ताः। याञ्चो भवतीति वा। यजुरुन्नो भवतीति वा। बहुकृष्णाजिन इत्यौपमन्यवः। यजूंष्येनं नयन्तीति वा।

२७७. **ऋत्विक्**—ईरणः। ऋग्यष्टा भवतीति शाकपूणिः। ऋतुयाजी भवतीति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

२७८. **कूपः**—कुपानं भवति, कुप्यतेर्वा ।

२७९. **स्तेनः**—संस्त्यानमस्मिन् पापकमिति नैरुक्ताः ।

२८०. **निर्णीतम्**—निर्णिक्तम् भवति ।

२८१. **दूरम्**—द्रुतं भवति । दुरयं वा ।

२८२. **पुराणम्**—पुरा नवं भवति ।

२८३. **नवम्**—प्रानीतं भवति ।

२८४. **दभ्रम्**—(अल्पम्) दभ्नोतेः । सुदम्भं भवति ।

२८५ **अर्भकः**—(अल्पम्) अवहृतं भवति ।

२८६. **तिरः**—तीर्णं भवति ।

२८७. **सतः**—संसृतं भवति ।

२८८. **त्वः**—(अधम्) अपततः ।

२८९. **नेमः**—(अर्धम्) अपनीतः ।

२९०. **अर्धम्**—हरतेर्विपरीतात् । धारयतेर्वा स्यात् । ऋध्नोतेर्वा स्यात् । ऋद्धतमो विभागः ।

२९१. **नक्षत्राणि**—न क्षत्राणि इति ब्राह्मणम् ।

२९२. **ऋक्षा**—उदीर्णानीव ख्यायन्ते । स्तृभिः स्तीर्णानीव ख्यायन्ते ।

२९३. **वम्र्यः**—वमनात् ।

CC-0. Prof. Satya Vrat Shastri Collection.

२९४. **सीमिका**—स्यमनात् ।

२९५. **उपजिह्विका**—उपजिघ्र्यः ।

Digitized By Siddhanta eGangotri Gyaan Kosha

२९६. **ऊदरम्**—उद्दीर्णं भवति, ऊर्ज दीर्णं वा ।

२९७. **कृदरम्**—कृतदरं भवति ।

२९८. **रम्भः**—(दण्डः) आरभन्त एनम् ।

२९९. **पिनाकम्**—(दण्डः) प्रतिपिनष्ट्येनेन ।

३००. **स्त्रियः**—स्त्यायतेरपत्रपणकर्मणः ।

३०१. **मेनाः**—(स्त्रियः) मानयन्त्येनाः ।

३०२. **ग्नाः**—(स्त्रियः) गच्छन्त्येनाः ।

३०३. **शेपः**—शपतेः स्पृशतिकर्मणः ।

३०४. **वैतसः** (शेपः) वितस्तं भवति ।

३०५. **स्वस्ति**—स्वस्तीत्यविनाश नाम । अस्तिरभिपूजितः । सु अस्तीति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अथ चतुर्थोऽध्यायः

३०६. **मर्यादा**—मर्या इति मनुष्य नाम मर्यादाभिधानं वा । मर्यैः आदीयत इति मर्यादा ।

३०७. **निधा**—पाश्या भवति । यन्निधीयते ।

३०८. **पाश्या**—पाशसमूहः ।

३०९. **पाशः**—पाशयतेर्विपाशनात् ।

३१०. **चक्षुः**—ख्यातेर्वा चष्टेर्वा ।

३११. **पूर्धिः**—पूरय देहीति वा ।

३१२. **पार्श्वम्**—पर्शुमयम् अङ्गं भवति ।

३१३. **पर्शुः**—स्पृशतेः । संस्पृष्टा पृष्ठदेशम् ।

३१४. **पृष्ठम्**—स्पृशतेः । संस्पृष्टमङ्गैः ।

३१५. **अङ्गम्**—अङ्गनाद् अञ्चनाद्वा ।

३१६. **श्रोणिः**—गतिचलाकर्मणः श्रोणतेः । गच्छतः श्रोणिः चलतीव ।

३१७. **दोः**—शिताम (बाहुः) भवति । द्रवतेः ।

CC-0. Prof. Satya Vrat Shastri Collection.

३१८. **श्यामम्**—श्यायतेः ।

३१९. **यकृत्**—यथा कथा च कृत्यते ।

Digitized By Siddhanta eGangotri Gyaan Kosha

३२०. शिवि—[illegible]।

३२१. मांसम्—माननम् मानसं वा। मनः अस्मिन् सीदतीति वा।

३२२. मेदः—मेद्यतेः।

३२३. चित्रम्—चायनीयं मंहनीयं धनमस्ति।

३२४. मेहना—महनीयम्। मे इह नास्ती' ति सन्धिरार्षः।

३२५ त्वादातम्—त्वया नः तद् दातव्यम्।

३२६. अद्रिः—वज्रः। आदृणाति एतेन। अपि वा अत्तेः।

३२७. राधः—इति धन नाम राध्नुवन्ति अनेन।

३२८. उभौ—समुब्धौ (पूर्णौ) भवतः।

३२९. दमूना—दमे मनो यस्यासौ दममनाः। दानमना वा दान्त मना वा। अपि वा दम इति गृहनाम तन्मनाः स्यात्।

३३०. मनः—मनोतेः।

३३१. अतिथिः—अभ्यतितो गृहान् भवति। अभ्येति तिथिषु परकुलानीति वा। परगृहाणीति वा।

३३२. दुरोणः—इति गृहनाम दुरवा भवन्ति दुस्तर्पाः।

३३३. मूषः—मूषिका। मुष्णातेः। मूषिकाऽप्येतस्मादेव।

३३४. त्रितः—तीर्णतमः मेधया। संख्यानाम एव अभिप्रेतं स्यात्। एकतः द्वितः त्रित इति त्रयो बभूवुः।

३३५. वासराणि—वेसराणि विवासनानि गमनानीति वा।

३३६. जठरम्—जठरं भवति। जग्धमस्मिन्निर्यते वीयते वा।

CC-0. Prof. Satya Vrat Shastri Collection.

३३७. मरुत्वान्—इन्द्रः। मरुद्भिः तद्वान् भवति।

Digitized By Siddhanta eGangotri Gyaan Kosha

३३८. **मधुः**—सोमम् इत्यौपमिकम्। माद्यतेः। इदमपीतरत् एतस्मादेव।

३३९. **तितउ**—परिपवनं भवति। ततवद्वा, तुन्नवद्वा। तिलमात्र-तुन्नमिति वा।

३४०. **सक्तुः**—सचतेः। दुर्धावो भवति। कसतेर्वा स्याद् विपरीतस्य। विकसितो भवति।

३४१. **भद्रम्**—भजनीयं भूतानामभिद्रवणीयम्। भवद् रमयतीति वा भाजनवद्वा।

३४२. **लक्ष्मीः**—लाभाद्वा। लक्षणाद्वा (लप्स्यनाद्वा) लाञ्छनाद्वा। लषतेर्वा स्यात् प्रेप्साकर्मणः। लग्यतेर्वा स्यादाश्लेषकर्मणः। लज्जतेर्वा स्यादश्लाघाकर्मणः।

३४३. **मन्दू**—मदिष्णू। अपि वा मन्दुना तेनेति स्यात्।

३४४. ईर्मान्ताः समीरितान्ताः सुसमीरितान्ताः पृथ्वन्ता वा।

३४५. **सिलिकमध्यमासः**—संसृतमध्यमाः शीर्षमध्यमा वा।

३४६. **शिरः**—शिर आदित्यो भवति। यदनुशेते सर्वाणि भूतानि। इदमपीतरच्छिर एतस्मादेव। समाश्रितान्येतदिन्द्रियाणि भवन्ति।

३४७. **शूरः**—शवतेर्गतिकर्मणः।

३४८. **दिव्या**—दिविजाः।

CC-0. Prof. Satya Vrat Shastri Collection.

३४९. **अत्या**—अतनाः।

३५०. **हंसा**—हन्तेर्घ्नन्त्यध्वानम्।

Digitized By Siddhanta eGangotri Gyaan Kosha

३५१. श्रेसिः—श्रकते [illegible] भवन्ति ।

३५२. कायमानः—चायमानः कामयमान इति वा ।

३५३. शीरम्—अनुशायिनम् इति वा । आशिनम् इति वा । सर्वमश्नुत इति वा ।

३५४. कनीनके—कन्यके ।

३५५. कन्या—कमनीया भवति । क्वेयं नेतव्येति वा । कमनेनानीयत इति वा । कनतेर्वा स्यात् कान्तिकर्मणः ।

३५६. दारु—दारु दृणातेर्वा । द्रणातेर्वा । तस्मादेव द्रु ।

३५७. तुग्व—तीर्थं भवति । तूर्णमेतदायन्ति ।

३५८. आहनसः—आहननवन्तः वञ्चनवन्तः ।

३५९. शुन्ध्युः—आदित्यो भवति शोधनात् । शकुनिरपि शुन्ध्युरुच्यते । शोधनादेव । उदकचरो भवति । आपोऽपि शुन्ध्युव उच्यन्ते शोधनादेव ।

३६०. नोधा—ऋषिर्भवति । नवनं दधाति ।

३६१. अद्मसत्—अद्मान्नं भवति ।

३६२. अद्मसादिनी—अन्नसानिनी इति वा । ससतः बोधयन्तीति वा ।

३६३. इष्मिणः—ईषणिन इति वैषणिन इति वार्षणिन इति वा ।

३६४. वाशी—इति वाङ्नाम । वाश्यत इति सत्याः ।

३६५. सुविते—सु इते, सूते प्रजायामिति वा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

३६६. **दुर्वर्तुः**—दुर्वारः।

३६७. **रयिः**—इति धन नाम। रातेर्दानकर्मणः।

३६८. **अकूपार**—आदित्यः, अकूपारो भवति दूरपारः। समुद्रोऽप्यकूपार उच्यते, अकूपारो भवति महापारः। कच्छपोऽप्यकूपार उच्यते, अकूपारो न कूपमृच्छतीति।

३६९. **कच्छपः**—कच्छं पाति। कच्छेन पातीति वा। कच्छेन पिबतीति वा।

३७०. **कच्छः**—खच्छः खच्छदः। अयमपीतरो नदीकच्छ एतस्मादेव। कम् उदकम् तेन छाद्यते।

३७१. **रक्षः**—रक्षितव्यमस्मात्। रहसि क्षणोतीति वा। रात्रौ नक्षत इति वा।

३७२. **सुतुकनः**—सुतुकनैरिति वा।

३७३. **सुप्रजाः**—सुप्रजोभिरिति वा।

३७४. **च्यवनः**—ऋषिर्भवति। च्यावयिता स्तोमानाम्। च्यवानमित्यपि, अस्य निगमा भवन्ति।

३७५. **युवा**—प्रयौति कर्माणि।

३७६. **रजः**—रजतेः। ज्योतिः रज उच्यते। उदकं रज उच्यते। लोका रजांस्युच्यन्ते। असृगहनी रजसी उच्येते।

CC-0. Prof. Satya Vrat Shastri Collection.

३७७. **हरः**—हरतेः। ज्योतिर्हर उच्यते। उदकं हर उच्यते। लोकाः हरांस्युच्यन्ते। असृगहनी हरसी उच्येते।

Digitized By Siddhanta eGangotri Gyaan Kosha

३७८. उस्रियाः—इति गौ नाम। उत्स्राविणोऽस्यां भोगाः। उस्रेति च।

३७९. हरिः—सोमः हरितवर्णः। अयमपीतरो हरिरेतस्मादेव।

३८०. वाशीभिः—अश्ममयीभिरिति वा। वाग्भिरिति वा।

३८१. शिश्नम्—श्नथतेः।

३८२. जामि—अतिरेक नाम। बालिशस्य वा। असमान जातीयस्य वोपजनः। समानजातीयस्येति केचित्।

३८३. पिता—पाता पालयिता वा। जनयिता वा।

३८४. माता—पृथिवी महतीयम्।

३८५. बन्धुः—संबन्धनात्।

३८६. नाभिः—सन्नहनात्। नाभ्या सन्नद्धा गर्भा इत्याहुः। एतस्मादेव ज्ञातीन् सनाभय इत्याचक्षते। सबन्धव इति च।

३८७. ज्ञातिः—संज्ञानात्।

३८८. उत्तानः—उत्ततानः। उर्ध्वतानो वा।

३८९. शंयुः—सुखंयुः। (शमनं च रोगाणां यावनं च भयानाम्)। अथापि शंयुर्बार्हस्पत्यः।

३९०. वस्त्रम्—वस्तेः।

३९१. तायुः—इति स्तेन नाम। संस्त्यानमस्मिन् पापकमिति नैरुक्ताः। तस्यतेर्वा स्यात्।

३९२. भरः—इति संग्राम नाम। भरतेर्वा। हरतेर्वा।

CC-0. Prof. Satya Vrat Shastri Collection.

३९३. नीचैः—निचितं भवति।

Digitized By Siddhanta eGangotri Gyaan Kosha

३९४. **उच्चैः**—उच्चैर्गतं भवति ।

३९५. **श्येनः**—शंसनीयं गच्छति ।

३९६. **यूथम्**—यौतेः । समायुतं भवति ।

३९७. **मन्दी**—मन्दतेः स्तुतिकर्मणः ।

३९८. **अपीच्यम्**—अपचितम् । अपगतम् । अपहितम् । अन्तर्हितम् वा ।

३९९. **दंसयः**—कर्माणि । दंसयन्ति एनानि ।

४००. **वियुते**—द्यावापृथिव्यौ । वियवनात् ।

४०१. **समानम्**—संमानमात्रं भवति ।

४०२. **मात्रा**—मानात् ।

४०३. **अन्तः**—अततेः ।

४०४. **ऋधक्**—इति पृथग् भावस्य प्रवचनं भवति । अथापि ऋध्नोत्यर्थे दृश्यते ।

४०५. **ररिवान्**—रातिरभ्यस्तः ।

४०६. **अजाः**—अजनाः ।

४०७. **शरत्**—शृता अस्यामोषधयो भवन्ति । शीर्णा आप इति वा ।

४०८. **वामः**—वननीयः ।

४०९. **पलितः**—पालयिता ।

CC-0. Prof. Satya Vrat Shastri Collection.

४१०. **होता**—ह्वाता ।

Digitized By Siddhanta eGangotri Gyaan Kosha

४११. **भ्राता**—भरतेर्हरतेर्वा कर्मणः। हरते भागं कर्त्तव्यो भवतीति वा।

४१२. **पातारम्**—पालयितारम्।

४१३. **सप्तपुत्रम्**—सप्तमपुत्रम्। सर्पणपुत्रं वा।

४१४. **चक्रम्**—चकतेर्वा चरतेर्वा। क्रामतेर्वा।

४१५. सप्तनामा—आदित्यः सप्तास्मै रश्मयो रसानभिसन्नामयन्ति। सप्तैनमृषयः स्तुवन्तीति वा। इदमपीतरत् (नाम) एतस्मादेव अभिसन्नामात्। स्वम् अर्थं प्रत्याययितुम् आभिमुख्येन संनमति इति नाम)।

४१६. **संवत्सर**—संवसन्तेऽस्मिन् भूतानि।

४१७. **ग्रीष्मः**—ग्रस्यन्तेऽस्मिन्रसाः।

४१८. **वर्षाः**—वर्षति आसु पर्जन्यः।

४१९. **हेमन्तः**—हिमवान् भवति।

५२०. **हिमम्**—हन्तेर्वा हिनोतेर्वा।

४२१. **अजरम्**—अजरणधर्माणम्।

४२२. **अनर्वम्**—अप्रत्यृतमन्यस्मिन्। यत्रेमानि सर्वाणि भूतान्यभि सन्तिष्ठन्ते।

४२३. **अराः**—प्रत्यृता नाभौ।

४२४. **मासा**—मानात्।

CC-0. Prof. Satya Vrat Shastri Collection.

४२५. **प्रधि**—प्रहितो भवति।

Digitized By Siddhanta eGangotri Gyaan Kosha

अथ सप्तमोऽध्यायः (दैवतकाण्डम्)

४२६. **दैवतम्**—यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतम्। यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति।

४२७. **गोपा**—गोपायिता सर्वेषां भूतानाम्।

४२८. **सुविदत्रम्**—धनं भवति। विन्दतेर्वैकोपसर्गात् ददातेर्वा स्याद् द्व्युपसर्गात्।

४२९. **मन्त्राः**—मननात्!

४३०. **छन्दांसि**—छादनात्।

४३१. **स्तोमः**—स्तवनात्।

४३२. **यजुः**—यजतेः।

४३३. **साम**—सम्मितमृचा अस्यतेर्वा। ऋचा समं मेन इति।

४३४. **गायत्री**—गायतेः स्तुतिकर्मणः। त्रिगमना वा विपरीता गायतो मुखादुदपतत् इति ब्राह्मणम्।

४३५. **उष्णिक्**—उत्स्नाता भवति, स्निह्यतेर्वा स्यात् कान्तिकर्मणः। उष्णीषिणीवेत्यौपमिकम्।

CC-0. Panini Kanya Maha Vidyalaya Collection.

४३६. **उष्णीषम्**—स्नायतेः।

Digitized By Siddhanta eGangotri Gyaan Kosha

४३७. **ककुप्**—कुब्जः ककुभिनो भवति, कुजतेर्वा उब्जतेर्वा ।

४३८. **अनुष्टुप्**—अनुष्टोभनात् । गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेन अनुष्टोभति ।

४३९. **बृहती**—परिबर्हणात् ।

४४०. **पंक्तिः**—पंचपदा ।

४४१. **त्रिष्टुप्**—स्तोभत्युत्तरपदा, स्तोभनीति वा । यत् त्रिरस्तोभत् तत् त्रिष्टुभस्त्रिष्टुप्त्वम् इति विज्ञायते ।

४४२. **त्रिता**—तीर्णतमं छन्दः, त्रिवृद्वज्रः ।

४४३. **जगती**—गततमं छन्दः, जलचरगतिर्वा, जल्गल्यमानोऽसृजत् । इति च ब्राह्मणम् ।

४४४. **विराट्**—विराजनाद्वा विराधनाद्वा विप्रापणाद्वा । सम्पूर्णाक्षरा ऊनाक्षरा अधिकाक्षरा वा ।

४४५. **पिपीलिका**—पेलतेर्गतिकर्मणः ।

४४६. **अग्निः**—अग्रणीर्भवति, अग्रं यज्ञेषु प्रणीयते । अङ्गं नयति सन्नममानः । अक्नोपनो भवतीति स्थौलाष्ठीविः । न क्नोपयति, न स्नेहयति । त्रिभ्यः आख्यातेभ्यो जायत इति शाकपूणिः । इतात् अक्ताद्दग्धाद्वा । नीतात् । स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परः ।

४४७. **देवः**—दानाद्वा दीपनाद्वा द्योतनाद्वा । द्युस्थानो भवतीति वा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

४४८. **देवता**—यो देव: सा देवता ।

४४९. **होतारम्**—ह्वातारम्, जुहोतेर्होतेत्यौर्णवाभ: ।

४५०. **रत्नधातमम्**—रमणीयानां धनानां दातृतमम् ।

४५१. **समनम्**—समननाद्वा, संमाननाद्वा (कल्याण्य: स्मय-मानास:) ।

४५२. **नसति:**—आप्नोति-कर्मा वा, नमति-कर्मा वा ।

४५३. **हर्य्यति**—प्रेप्साकर्मा, विहर्य्यतीति ।

४५४. **दिव्य:**—दिविज: ।

४५५. **गरुत्मान्**—गरणवान्, गुर्वात्मा, महात्मेति वा ।

४५६. **जातवेद:**—जातानि वेद, जातानि वैनं विदु:, जाते-जाते विद्यते इति वा, जातवित्तो वा, जातविद्यो वा । यत्तज्जात: पशूनविन्दत (इति) तज्जातवेदसो जातवेदस्त्वम् इति ब्राह्मणम् ।

४५७. **निदहाति**—निश्चयेन दहति, भस्मी करोति ।

४५८. **वैश्वानर:**—विश्वान्नरान्नयति, विश्व एनं नरा नयन्तीति वा । अपि वा विश्वानर एव स्यात् प्रत्यृत: सर्वाणि भूतानि तस्य वैश्वानर: ।

४५९. **पूरव:**—पूरयितव्या मनुष्या: ।

४६०. **दस्यु:**—दस्यते: क्षयार्थात् [illegible] रसा:, उपदा-सयति कर्माणि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

४६१. **घृतम्**—इति उदकं नाम, जिघर्तेः। सिञ्चतिकर्मणः।

४६२. **जमदग्निः**—जमदग्नयः प्रजमिताग्नयः वा प्रज्वलिताग्नयस्तैरभिहुतः।

४६३. **भर्मणे**—भरणाय च भुवनाय च भावनाय धारणाय च।

४६४. **ऋग्मियम्**—ऋग्मन्तमिति वा अर्चनीयम् इति वा। पूजनीयम् इति वा।

४६५. **विवस्वान्**—विवासनवान्, प्रेरितवतः परागतात् वा अपि अस्य अग्नेः वैश्वानरस्य मातरिश्वानम् आहर्त्तारम् आह।

४६६. **मातरिश्वा**—मातरि अन्तरिक्षे श्वसिति वा मातरि आशु अनिति (चलति) इति।

४६७. **मूर्धा**—मूर्तमस्मिन्धीयते, मूर्धा यः सर्वेषां भूतानां भवति।

४६८. **आदितेयम्**—अदितेः पुत्रम्।

४६९. **मिथुनौ**—मिनोतिः श्रयति कर्मा, थु इति नामकरणः थकारो वा। नयतिः परः, वनिः वा। समाश्रितौ अन्योन्यं नयतः वनुतः वा। मनुष्यमिथुनावपि एतस्मादेव, मेथन्तौ अन्योन्यं वनुतः इति वा।

४७०. **सुपर्ण्यः**—सुपतनाः रात्रयः।

४७१. **सविता**—प्रसविता, सूयते कर्माणीति वा।

४७२. **सवितारम्**—सर्वस्य प्रसवितारम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

ऋग्वैदिक छन्द

पादों में वर्ण संख्या

छन्द	प्र० पाद	द्विपा०	तृपा०	चपा०	पंपा०	योग
१. गायत्री	८	८	८	×	+	=२४
२. उष्णिक्	८	८	१२	×	×	=२८
३. अनुष्टुप्	८	८	८	८	×	=३२
४. बृहती	८	८	८	१२	×	=३६
५. पंक्ति	८	८	८	८	८	=४०
६. त्रिष्टुप्	११	११	११	११	×	=४४
७. जगती	१२	१२	१२	१२	×	=४८

गा उ/अ बृ/पं त्रि ज

१. किसी गायत्री छन्द में एक वर्ण कम हो तो 'निचृत्' साथ लगाकर बोलें।

२. किसी छन्द में दो वर्ण कम हों तो 'विराट्' साथ लगाकर बोलें।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

३. किसी छन्द में एक वर्ण अधिक हो तो 'भुरिक्' साथ लगा कर बोलें।

४. किसी छन्द में दो वर्ण अधिक हों तो 'स्वराट्' साथ लगा कर बोलें।

५. किसी छन्द में पूर्ण वर्ण ठीक-ठीक हो तो छन्द का नाम लगाकर बोलें।

जैसे—निचृत् गायत्री, विराट् गायत्री, भुरिक् गायत्री स्वराट् गायत्री, गायत्री।

विशेष प्रष्टव्य शब्द

हिरण्यम्	रात्रिः	पन्था
जातवेदाः	समुद्रः	वृत्रः
गायत्री	आदित्यः	दधिक्राः
निर्ऋतिः	स्वः	वैश्वानरः
वृबूकम्	अश्वः	काष्ठाः
अग्निः	पृश्निः	

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

नवीन संस्कृत रचनाएं

Digitized By Siddhanta eGangotri Gyaan Kosha

संस्कृत शिक्षण पुस्तकें :-

१. संस्कृत शिक्षण चार्ट (आगे)
२. हिन्दी संस्कृत धातु कोष
३. चुटकुला शतकम्
४ बाल संस्कृत वार्तालाप
५. विशेष संस्कृत वार्तालाप
६. सामान्य संस्कृत वार्तालाप
७. संस्कृत सम्भाषण विधा:
८. क्रीडा शतकम् (भागश:)
९. निरुक्त निर्वचनिका
१०. रसालंकार छन्दोदीपिका
११. स्मारिका (संस्कृत विवरण)
१२. मीमांसा प्रमेय
१३. भाष्य भूमिका सार
१४. प्रतिनिधि शब्द रूपावली
१५. प्रतिनिधि धातु रूपावली
१६. दिल्ली संस्कृत निर्दशिका

संस्कृत शिक्षण चार्ट :-

१. प्रायोगिक संस्कृत विभाग:
२. कारक विभक्ति ज्ञान चित्रम्
३ परस्मैपद षट्लकार चित्रम्
४. परस्मैपद प्रत्ययार्थ चित्रम्
५. आत्मनेपद प्रत्ययार्थ चित्रम्
६, मुख्य स्वरान्त रूप चित्रम्
७. मुख्य हलन्त रूप चित्रम्—१
८. मुख्य हलन्त रूप चित्रम्—२
९. उपसर्ग, उपपद प्रयोग चित्रम्
१०. सर्वनाम रूपार्थं चित्रम्
११. सामान्य विशेषण रूपार्थ चित्रम्
१२. संख्या विशेषण रूपार्थ चित्रम्
१३. प्रमुख अव्ययार्थ चित्रम् (सं.हि.)
१४. ,, ,, ,, (हि.सं.)
१५. दशगणी धातु रूपार्थ चित्रम्
१६. ,, ,, ,, ,,

नवीन कार्यालय संकेत :-
५९/८, मध्य मार्ग, तुगलकाबाद विस्तार, नव दिल्ली-१९

CC-0. Prof. Satya Vrat Shastri Collection.